International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 24-26
© 2022 IJSR
www.anantaajournal.com
Received: 09-04-2022
Accepted: 22-05-2022

**वि. टि. हरिप्रसादः**
शोधप्रबन्ध छात्रः, एस्. सि. एस्. वि.एम्.वि, (श्री चन्द्रशेखरेन्द्र सरस्विति विश्वमहाविद्यालयः), एनात्तूर् काञ्चीपुरम्, तमिल् नाटु, भारत

**Corresponding Author:**
**वि . टि. हरिप्रसादः**
शोधप्रबन्ध छात्रः, एस्. सि. एस्. वि.एम्.वि, (श्री चन्द्रशेखरेन्द्र सरस्विति विश्वमहाविद्यालयः), एनात्तूर् काञ्चीपुरम्, तमिल् नाटु, भारत

# अमरकोशस्य पारमेश्वरीटीका।

**वि. टि. हरिप्रसादः**

## प्रस्तावना

अमरसिंहेन विरचितस्य नामलिङ्गानुशासनमिति प्रसिद्धस्य कोशस्य संस्कृते अन्यासु भारतीयभाषासु बहूनि व्याख्यानानि सन्ति। यद्यपि अमरकोषस्य संस्कृतव्याख्यानानि संस्कृतपदानां सामान्यस्वरूपविज्ञानं प्रति योगदानं ददति तथापि केचन भाष्यकाराः शब्दस्य अन्यविशेषतानां च चर्चां कर्तुं सावधानाः अभवन् । अमरकोषस्य कैरल्यां समुल्लतिसा पारमेश्वरीटीका संस्कृतेतरभाषाव्याख्यासु अन्यतमा अस्ति। यथा शकुन्तले चतुर्थोङ्कः तत्र श्लोकचथुष्टयम् इति प्रसिद्धा प्रथा अस्ति तथा परमेश्वरीटीका अन्यासु टीकासु मध्ये प्रथमा तत्रापि ओषधिवर्गव्याख्या अतीवविशिष्टा इति वक्तुं अभिलषामः। यतः पारमेश्वरीकारः वैद्यशास्त्रविषये अतिविज्ञः प्रयत्नशाली चासीत्। तस्य वैद्यशास्त्रविषयकं समस्तमपि वैदुष्यं ओषधिवर्गव्याख्याने दरीदृश्यते। वादग्रस्तविषयानां व्याख्यानावसरे इतरेषां पण्डितानां अभिमतानि प्रदर्श्य त्याजग्राह्यविवेचनबुद्ध्या स्वकीयं मतं नानाविधैः दृष्टान्तैस्सह सोऽयं पण्डितः स्पष्टीकरोति । स्वमतस्थापनावसरे यथा पारमेश्वरीकारः अत्युत्साहेन स्वकीयस्य विषयस्य वैशद्याय यतते तथा अन्यविबुधाः न यतन्त इति वक्तुं शक्यते। अपि च तैनेव ओषधिवर्गव्याख्यानारम्भे

नत्वा गुरुपदाम्भोजं स्मृत्वा तदुदितां गिरम्।
व्याख्यामोषधिवर्गस्य कुर्वे प्रत्येकविस्तराम्।।

इति प्रतिज्ञातम्। ओषधिवर्गे अमरसिंहेन यानि यानि पर्यायपदानि प्रदर्शितानि तेभ्योप्यधिकानि तेषां नामान्तराणि अन्यस्मात् कोशात् समुद्धृत्य अत्र गुणपाठेन सह विशदीकरोति व्याख्याता।

शरीरिणां वैद्यशास्त्रज्ञानमवश्यं विज्ञेयमित्यनेन स्वीये व्याख्याने विस्तारभयमित्याशङ्का अनावश्या इति तदीयमभिमतमपि वर्गारम्भे तेनैवोक्तम्। धन्वन्तरीनिघण्डु, ओषधिनि घण्डु, राजनिघण्डु, रुद्रनिघण्डु, भावप्रकाशम् इत्यनेकानां कोशानां पश्चाद्बलेन एकैकानां ओषधीनां विवरणं करोत्याचार्यः। पारमेश्वरीकारस्य व्याख्यानरीतिमधिकृत्य द्वित्राण्युदाहरणानि अत्र प्रदर्शयामि।

उदुम्बरपर्णी इति ओषधिविशेषस्य पदार्थविवरणे पारमेश्वर्याम् एवं दृश्यन्ते।उदुम्बरपर्णी - ईकारन्त स्त्रीलिङ्गः प्रथमैकवचनम् इति अन्त-लिङ्ग-वचनानि सामान्यतया प्रदश्यं उदुम्बरस्य पर्णमिव पर्णमस्तीत्यनेन उदुम्बरपर्णी इति पदनिरुक्तिं करोति। अनन्तरं, शब्दोयं नागदन्तिनः पर्यायः।रामाश्रमी- कारः वज्रदन्तिनः इति, बालप्रियाकारः नागदन्तिनः इति च प्रामाणिकानामाचार्याणाम् अभिमतभेदानि प्रदर्शयित्वा स्वकीयमतस्थापनं करोति। नागदन्ती बाला, स्थूला इति द्विविधमस्ति। अतः अत्रोक्तपर्यायः बालनागदन्तिनः नामान्तरमिति प्रत्येकं प्रस्तावनार्हं भवति।राजनिघण्डुः उदुम्बरपर्णिमधिकृत्य एवं वदति।

दन्ती शीघ्रं श्येनघण्टा निकुम्भी
नागस्फोता दन्तिनी चोपचित्रा।
भद्रा रूक्षा रोचनी चानुकूला
निश्शल्या स्याद्बकदन्ता विशल्या।।
मधुपुष्पैरण्डफला भद्राण्येरण्डपत्रिका।
उदुंबरदला चैव तरुणी चाणुरेवती।।

विशोधनी च कुम्भी च ज्ञेया चाग्निकराह्वया।। इति पर्यायाः। ओषधीयं कफवातरोगेषु, महोदरे, अर्शोरोगे, व्रणे, अश्मर्याम्, उगरशूले, अग्निमान्द्ये, त्वग्दोषे च उत्तमा तथा शल्यविशोधनेन विरेचनप्रदा चास्ति।धन्वन्तर्याम्-

द्रवन्ती लम्बरी चित्रा न्यग्रेधा मूषिकाह्वया।
प्रत्यक्श्रेणी विषा चण्डा पत्रश्रेण्याखुपर्णिका।।
मूषकाह्वादिका कर्णी प्रतिपर्णी शिफा च सा।
सहस्रमूली विक्रान्ता ज्ञेया स्याच्चतुरेकधा।। इति पर्यायान्तराणि।

एवं अमरकोशकथितात् पर्यायात् विभिन्नानां नानाविधानां पर्यायाणां प्रदर्शनेन तथा सस्यस्य गुणविस्तारेण च वैद्यविद्यार्थीनां कृते अतीवोपयोगी भवति अमरकोशस्य पारमेश्वरीटीका।

आम्रवृक्षस्य पर्यायाणां विशदीकरणावसरे आचार्यः पर्यायाणां अर्थविशेषमपि विस्तारेण कथयति। यथा-
आम्रश्चूतो रसालोसौ सहकारोति सारैभः। इति श्लोकार्धेन पर्यायत्रयमेव प्रदश्यं तत्रापि सहकारः अतिसौरभयुक्तः इति केवलकथनेन अमरसिंहः विरमति। किन्तु अयं व्याख्याता

आम्रो रसालो माकन्दः कामाङ्गः पिकबान्धवः।
वनपुष्पोत्सवश्चूतः परपुष्टो मदोद्भवः।।
मधुश्चूतो मधुफलः सुफलो मदिरासवः।
वसन्तपादपोसौ तु सहकारोति सौरभः।। इति

चतुर्दशाधिकानि नामान्तराणि ग्रन्थान्तरेभ्यः उद्धृत्य आम्रस्य रसगुणादिविषयः विशदीकरोति। अनन्तरं अन्योपि विशेषः एवं प्रस्तौति।

अपुष्पफलवानाम्रः पुष्पितश्चूत उच्यते।
पुष्पैः फलैश्च संयुक्तः सहकार इति स्मृतः।।

चूतादीनां पर्यायाणामीदृशं विशेषकथनम् अन्यत्र अमरकोशव्याख्यासु न दृश्यते। पुष्पितश्चूत उच्यते इति नूतनज्ञानं

चूताङ्कुरास्वादकषायकण्ठः, चूतबाणः इत्यादेः कविप्रयोगस्य अर्थवैशद्ये अतीवसहायकमस्तीति वक्तुं सन्देहलेशो नास्ति। एवंविधया विशदेन विपुलेन व्याख्यानेन परिलसिता अमरकोशस्य पारमेश्वरीटीका संस्कृतपिपठिषूणामतीवोपयोगी वर्तते।

## References


1. अमरकोशः - पारमेश्वरी टीका।
2. अमरकोशः - रामाश्रमी टीका।
3. अमरकोशः - माहेश्वरीटीका।
4. अमरकोशः - बालप्रिया व्याख्या।